संसाद्य या जम्भमथानुशोचन्
सरस्वतीं प्रत्यभियाय तूष्णीम् ॥”)

विनसः, त्रि, (विगता नासिका यस्य । नसादेशः।) गतनासिकः । तत्पर्य्यायः । विग्रः २ विख्रुः ३ विनासकः ४ । इति जटाधरः ॥

विना, व्य, ( वि+“विनञ्भ्यां नानाञौ न सह ।” ५ । २ । २७ । इति ना ।) वर्ज्जनम् । तत्पर्य्यायः । पृथक् २ अन्तरेण ३ ऋते ४ हिरुक् ५ नाना ६ । इत्यमरः ॥ ( शब्देनानेन योगे “पृथग्विनेति ।” २ । ३ ।३२। इत्यनेन तृतीया पञ्चमी च स्यात् । एवं “पृथग्विना नानाभिरिति योगविभागो द्वितीयार्थः ॥” इति काशिकोक्त्या द्वितीयापि । यथा, तत्रैव ।
“विना वातं विना वर्षं विद्युत्प्रपतनं विना ।
विना हस्तिकृतान्दोषान् केनेमौ पातितौ द्रुमौ ॥”
तृतीयाप्रयोगो यथा, रघुवंशे २ । १४ ।
“शशाम वृष्ट्यापि विना दवाग्निः ॥”
पञ्चमीप्रयोगो यथा, सांख्यकारिकायाम् ।४१।
“चित्रं यथाश्रयमृते
स्थाण्वादिभ्यो विना यथा छाया ।
तद्वद्विना विशेषै-
र्न तिष्ठति निराश्रयं लिङ्गम् ॥” )

विनाकृतं, त्रि, (विना अन्तरेण कृतम् ।) त्यक्तम् । इति त्रिकाण्डशेषः ॥

विनायकः, पुं, (विशिष्टो नायकः ।) बुद्धः । गणेशः । इत्यमरः ॥ (यथा, कथासरित्सागरे ।३० । ५५ ।
“अस्तीह प्रमदोद्याने तरुमण्डलमध्यगः ।
दृष्टप्रभावो वरदो देवदेवो विनायकः ॥”)
गरुड़ः । विघ्नः । (यथा, हरिवंशे ।१८१।६५।
“राक्षसाश्च पिशाचाश्च भूतानि च विनायकाः ॥”)
गुरुः । इति मेदिनी । के, ११२ ॥ * ॥ विनायकगणो यथा,—
“शाङ्गेयो विघ्नराजश्चैव द्वौ विज्ञेयौ विनायकौ ॥”
इति वह्निपुराणे गणभेदनामाध्यायः ॥ * ॥
विनायकस्योत्पत्तिर्यथा,—

प्रजापाल उवाच ।
“कथं गणपतेर्जन्म मूर्त्तिमत्त्वञ्च सत्तम ! ।
एतन्मे संशयं छिन्धि धृतिकष्टं यवस्थितम् ॥

महातपा उवाच ।
पूर्ब्बं देवगणाः सर्ब्बे ऋषयश्च तपोधनाः ।
कार्य्यारम्भे यथा प्राप्ताः सिद्धिं ते च न संशयः ॥
सन्मार्गावस्थितेषु यथाऽसिध्यन्ति विघ्नतः क्रियाः ।
असत्कारिषु सर्ब्बेषु तद्वदेवमविघ्नतः ॥
ततो देवाः सपितरश्चिन्तयामासुरीजसा ।
असत्कार्य्येषु विघ्नार्थं सर्ब्ब एवाभ्यमन्त्रयन् ॥
ततस्तेषां तदा मन्त्रं कुर्ब्बतां त्रिदिवौकसाम् ।
बभूव बुद्धिर्गमने रुद्रं प्रति महामते ॥
ते तत्र रुद्रमामन्त्र्य कैलासनिलयं गुरुम् ।
ऊचुः सविनयं सर्ब्बे प्रणिपातपुरःसरम् ॥

देवा ऊचुः ।
देवदेव महादेव शूलपाणे त्रिलोचन ।
विघ्नार्थमविशिष्टानां उत्पादयितुमर्हसि ॥
एवमुक्तस्तदा देवैर्भवः परमया मुदा ।
उमां निरीक्षयामास चक्षुषानिमिषेण ह ॥
देवानां सन्निधौ तस्य पश्यतो मां महात्मनः ।
चिन्ताभूद्व्योम्नि मूर्त्तेभ्यो दृश्यते केन हेतुना ॥
पृथिव्या विद्यते मूर्त्तिरपां मूर्त्तिस्तथैव च ।
तेजसः श्वसनस्यापि मूर्त्तिरेषा तु दृश्यते ॥
आकाशस्य कथं नेति मत्वा देवो जहास च ।
ज्ञानशक्तिः परान् दृष्ट्वा यदृष्टं व्योम्नि शम्भुना ॥
यच्चोक्तं ब्रह्मणा पूर्ब्बं शरीरन्तु शरीरिणाम् ।
यथापि हसितं तेन देवेन परमेष्ठिना ॥
एतत्कार्य्यचतुष्केण पृथिव्यादिचतुर्ष्वपि ।
मूर्त्तिमानतितेजस्वी हसतः परमेष्ठिनः ॥
प्रद्योतास्यो महादीप्तः कुमारो भासयन् दिशम् ।
परमेष्ठिगुणैर्युक्तः साक्षाद्रुद्र इवापरः ॥
उत्पन्नमात्रो देवानां योषितः संप्रमोहयन् ।
कान्त्या दीप्त्या तथा मूर्त्त्या रूपेण च
महात्मवान् ॥
तं दृष्ट्वा परमं रूपं कुमारस्य महात्मनः ।
उमा निमिषनेत्राभ्यां तमपश्यत भामिनी ॥
तं दृष्ट्वा कुपितो देवस्तीव्रकोपसमन्वितः ।
मत्वा कुमाररूपन्तु शोभनं मोहनं दृशाम् ।
ततः शशाप तं देवो गणेशं परमेश्वरः ॥
कुमार गजवक्त्रस्त्वं प्रलम्बजठरस्तथा ।
भविष्यति तथा सर्पैरुपवीतगतिर्ध्रुवम् ॥
एवं शशाप तं देवस्तीव्रकोपसमन्वितः ।
धुन्वन् शरीरमुत्थाय ततो देवो रुषान्वितः ॥
यथा यथासौ स शरीरमाद्यं
धुनोति देवस्त्रिशिखास्त्रपाणिः ।
तथा तथा चाङ्गरुहाच्चकास
जलं क्षितौ संन्यपतंस्तथान्ये ॥
विनायकानेकमुखा गजास्या-
स्तमालनीलाञ्जनसन्निकाशाः ।
उत्तस्थुरुच्चैर्विविधास्त्रहस्ता-
स्ततस्तु देवा मनसाकुलेन ॥
किमेतदित्यद्भुतकर्म्मकारी
लोकः करोत्यप्रतिमं महच्च ।
कार्य्यं सुराणां कृतमेतदिष्टं
भवेत्तथैतं परितं कुलस्तत् ॥
दिवौकसां चिन्तयतां तथा तु
विनायकैः क्ष्मा क्षुभिता बभूव ।
चतुर्मुखश्चाप्रतिमो विमान-
मारुह्य खे वाक्यमिदं जगाद ॥
धन्यास्तु देवा सुरनायकेन
त्रिलोचनेनाद्भुतरूपिणा च ।
अनुगृहीताः परमेश्वरेण
सुरद्विषां विघ्नकृतां वतौ च ।
इत्येवमुक्त्वा प्रपितामहस्ता-
नुवाच देवस्त्रिशिखास्त्रपाणिम् ॥
यस्ते विभो वक्त्रसमुद्भवः प्रभु-
र्विनायका नाम वसन्त्विमेऽनुगाः ।
भवन्त्वथास्यात्मवरेण चाम्बरे
त्वया च तुष्टस्तु शरीरचारी ॥
आकाशमेतद्बहुधा व्यवस्थितं
त्वया चैको वदतां ते प्रयाताः ।
प्रभुर्भवत्वप्रतिमास्त्रपाणिना
इमान् हि चास्त्रैः सुवरांश्च देहि ॥
इत्येवमुक्त्वाभिगते पितामहे
त्रिलोचनस्त्वात्मभवं जगाद ।
विनायको विघ्नकरो गजास्यो
गणेशनामा तु भवस्य पुत्त्रः ॥
एते च सर्ब्बे त्वपयान्तु भृत्या
विनायकाः क्रूरदृशः प्रचण्डाः ।
उच्छुष्मदानादिविरुद्धदेहाः
कार्य्येषु सिद्धिं प्रतिपादयन्तः ॥
भवांश्च वेदेषु तथा मखेषु
कार्य्येषु चान्येषु महानुभावात् ।
अग्रेषु पूजां लभतेऽन्यथा च
विनाशयिष्यस्यथ कार्य्यसिद्धिम् ॥
इत्येवमुक्तः परमेश्वरेण
सुरैः समं काञ्चनकुम्भसंस्थैः ।
जलैस्तथासावभिषिक्तगात्रो
रराज राजेन्द्रः विनायकानाम् ॥
दृष्ट्वाभिषिच्यमानं तु देवास्तं गणनायकम् ।
तुष्टुवुः प्रयताः सर्ब्बे त्रिशूलास्त्रस्य सन्निधौ ॥

देवा ऊचुः ।
नमस्ते गजवक्त्राय नमस्ते गणनायक ।
विनायक नमस्तेऽस्तु नमस्ते चण्डविक्रम ॥
नमोऽस्तु ते विघ्नकर्त्रे नमस्ते सर्पमेखल ।
नमस्ते रुद्रवक्त्रोत्थ प्रलम्बजठराश्रित ।
सर्ब्बदेवनमस्कारादविघ्नं कुरु सर्ब्बदा ॥
एवं स्तुतस्तदा देवैर्महात्मा गणनायकः ।
अभिषिक्तस्तु रुद्रेण सोमस्यापत्यतां गतः ॥
एतच्चतुर्थ्यां सम्पन्नं गणाध्यक्षस्य पार्थिव ।
यतस्ततोऽयं महती तिथीनां परमा तिथिः ॥
एतस्यां यस्तिलान् भक्त्या भुक्त्वा गणपतिं नृप ।
आराधयति तस्याशु तुष्यते नात्र संशयः ॥
यश्चैतत् पठते स्तोत्रं यश्चैतत् शृणुयात्तथा ।
तस्य विघ्ना न जायन्ते न पापं सर्ब्बथा नृप ॥”
इत्यादि वाराहे विनायकोत्पत्तिनामाध्यायः ॥ * ॥
विनायकस्य नामाष्टकस्तोत्रं यथा,—

श्रीविष्णुरुवाच ।
“गणेशमेकदन्तञ्च हेरम्बं विघ्ननायकम् ।
लम्बोदरं शूर्पकर्णं गजवक्त्रं गुहाग्रजम् ।
नामाष्टकार्थं पुत्त्रस्य शृणु माते हरप्रिये ।
स्तोत्राणां सारभूतञ्च सर्ब्बविघ्नहरं परम् ॥
ज्ञानार्थवाचको गश्च णश्च निर्ब्बाणवाचकः ।
तयोरीशं परं ब्रह्म गणेशं प्रणमाम्यहम् ॥१॥
एकशब्दः प्रधानार्थो दन्तश्च बलवाचकः ।
बलं प्रधानं सर्ब्बस्मादेकदन्तं नमाम्यहम् ॥२॥
दीनार्थवाचको हेश्च रम्बः पालकवाचकः ।
परिपालकं तं दीनानां हेरम्बं प्रणमाम्यहम् ॥३॥
विपत्तिवाचको विघ्नो नायकः खण्डनार्थकः ।
विपत्खण्डनकारन्तं नमामि विघ्ननायकम् ॥४॥